दृश्यमिदं सर्व्वं यत्किञ्चित् सचराचरम्। मनसो ह्युन्मनीभावे द्वैतभावः प्रणश्यति। ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम्। मानसे विलयं याते कैवल्यमपि कल्पते। लयो लय इति प्राहुः कीदृशं लयलक्षणम्। स पुनर्वासनोत्थानो लयो विषयविस्मृतिः। एवं नानाविधोपायाः सम्यक्स्वानुभवान्विताः। समाधिमार्गाः कथिताः पूर्व्वाचार्य्यैर्महात्मभिः। सुषुम्णायै कुण्डलिन्यै सुधायै चन्द्रजन्मने। मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने। अशक्यतत्त्वबोधानां मूढ़ानामपि सम्मतम्। प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते" हठप्र०।

नादानुसन्धानप्रशंसा यथा, "श्रीआदिनाथेन सपादकोटिप्रकाराः कथिता जयन्ति। नादानुसन्धानकमेव कार्य्यं मन्यामहे नान्यतमं लयानाम्। मुक्तासने स्थितो योगी मुद्रां सन्धाय शाम्भवीम्। शृणुयाद्दक्षिणे कर्णे नादमेकान्तके सुधीः। काष्ठैः प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति। नादे प्रवर्त्तितं चित्तं नादेन सह लीयते। श्रवणमुखनयननासानिरोधनेनैव कर्त्तव्यः। सुषुम्णामार्गेण स्फुटममलः श्रूयते नादः" हठप्र०।

"आरम्भश्च घटश्चैव तथा परिचयस्तथा। निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम्। विसृज्य सकलं बाह्यं नादे दुग्धाम्बुवन्मनः। एकीभूयाथ सहसा चिदाकाशे विलीयते। औदासीन्यपरो भूत्वा सदाभ्यासेन संयमी। उन्मनीकरणं सद्यो नादमेवावधारयेत्"। शीतकाले चौपटी वा कटी वा पथ्याहारे गोपथे वा पथे वा भक्ष्ये भिक्षाहृन्दनारण्यकन्दं पाणौ द्रोणीकर्परं भोज्यपात्रम्। सर्व्वचिन्तां परित्यज्य सर्व्वकाले च सर्व्वदा। नादमेवानुसन्धत्ते नादे चित्तं विलीयते" हठप्र०।

आरम्भावस्था "ब्रह्मग्रन्थिर्भवेद्भिन्न आनन्दः शून्यसम्भवः। विचित्रक्वणको देहे श्रूयतेऽनाहतो ध्वनिः। सम्पूर्णहृदये शून्ये आरम्भो योगवान् भवेत्" हठप्र०।

घटावस्था "द्वितीयायां घटीकृत्य वायुर्भवति मध्यमः। दृढ़ासनो भवेद्योगी ज्ञानी देवसमस्तथा। विष्णुग्रन्थिर्यदा भिन्नः परमानन्दसूचकः। अतिशून्यविभेदश्च भेरीशब्दस्तथा भवेत्" हठप्र०।

परिचयावस्था "तृतीयग्रन्थिभेदे तु जायते मर्द्दलध्वनिः। महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम्। चित्तानन्दं ततो जित्वा सहजानन्दसम्भवः। दोषदुःखक्षुधानिद्राजरामृत्युविवर्जितः। रुद्रग्रन्थिं ततो भित्त्वा सर्व्वपीठगतोऽनिलः" हठप्र०।

निष्पत्त्यवस्था "निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत्। एकीभूतं तदा चित्तं राजयोगाभिधायकम्। सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत्। अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम्। लयोद्भवमिदं सौख्यं राजयोगादवाप्यते। राजयोगपदं प्राप्तुं सुखोपायश्च चेतसाम्। हठं विना राजयोगो राजयोगं विना हठः। मनः प्रलयसन्धायी जायते नादजो लयः" हठप्र०।

नादानुसन्धानं तत्फलञ्च "नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदये प्रवृद्धम्। आनन्दमेकं वचसामवाच्यं जानाति तत्त्वं गुरुनाथ एव। कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः। तत्र चित्तं स्थिरीकुर्य्याद्यावत् स्थिरपदं व्रजेत्। सर्व्वचिन्तां परित्यज्य सावधानेन चेतसा। नादमेवानुसन्धत्ते योगसाम्राज्यमिच्छता। मकरन्दं पिबन् भृङ्गो गन्धान्नापेक्षते यथा। नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षति। नादश्रवणतः क्षिप्तमन्तरङ्गभुजङ्गमः। विस्मृत्य सर्व्वमेकाग्रं कुत्रचिन्न हि धावति। मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः। नियामनसमर्थोऽयं निनादो निशिताङ्कुशः। नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते। अन्तरङ्गकुरङ्गस्य रोधे बाधायतेऽपि च। अन्तरङ्गस्य यमिनो वाजिनः परिघायते। नादोपास्तिरतो नित्यमवधार्य्यापि योगिनः। अभ्यस्यमानो नादोऽयं बाह्यमावर्त्तयेद् ध्वनिम्। पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत्। श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्। वर्द्धमाने ततोऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः। आदौ जलधिजीमूतभेरीनिर्झरनिःस्वनः। मध्ये मर्द्दलशङ्खोत्थघण्टाकोलाहलस्तथा। अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनः। इति नानाविधो नादः श्रूयते देहमध्यतः। महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ। तत्र सूक्ष्मतरं ध्वानं नादमेव परामृशेत्। यत्र कुत्रापि वा नादे लगति प्रथमं मनः। तत्रैव तत् स्थिरीभूय तेन सार्द्धं विलीयते। घण्टानिनादसक्तस्य शब्दान्तःकरणस्य तु। अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः। ध्वनेरन्तर्गतं ज्योतिर्ज्ञेयस्यान्तर्गतं मनः। तन्मनो विलयं याति तद्विष्णोः परमं पदम्। तावदाकाशसङ्कल्पो यावत् शब्दः प्रवर्त्तते। निःशब्दं तत्परं ब्रह्म परमात्मा समीर्य्यते। यत् किञ्चि-